# आचार्याणां रणजित कुमार बर्मनवर्याणां

## सौप्रस्थानिकपर्व

(३१/१०/२०२३)




केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलसचिवपदस्थानाम् अजातशत्रूणां च आचार्याणां रणजित कुमार बर्मनवर्याणां सेवानिवृत्तिमुपलक्ष्य सायं (३१/१०/२३) सौप्रस्थानिकपर्व मुख्यालये कुलपतीनाम् आध्यक्ष्ये च समायोजितम्। सर्वपरिसरीयाः निदेशकाः अधिष्ठातारः मुख्यालयस्य सर्वे अधिकारिणः कर्मचारिणश्च अस्मिन् सौप्रस्थानिकपर्वणि सश्रद्धं भागमगृह्णन्।

प्राशासनिकं पदम् अतीव सूक्ष्मं पदम्। तत्पदमारुह्य सेवानिवृत्तिपर्यन्तमपि कुलसचिवपदे स्थित्वा त्रिकरणशुध्या कार्यं कृत्वा कोऽपि कुलसचिवः सेवानिवृत्तः भविष्यति इत्येषा संस्कृतलोकस्य विशेषवार्ता एवेति प्रत्यक्षरूपेण परोक्षरूपेण ( Online) च समुपस्थिताः सर्वे स्वाभिप्रायान् प्राकटयन्। आचार्याः सर्वनारायण झा वर्याः सकारात्मकचिन्तनोपेतानां कुलसचिवानां गुणगणान् उदाहरन्। आचार्याः अतुलकुमारनन्दवर्याः आचार्याः सुदेशकुमारशर्मवर्याः , प्रो. प्रभातकुमार महापात्रवर्याः, प्रो. पी.वी.बी. सुब्रह्मण्यम् वर्याः, प्रो. गोविन्द पाण्डे वर्याः अन्ये निदेशकाः सानन्दं प्रो. रणजित कुमार बर्मनवर्याणां गुणविशेषान् उपावर्णयन्। विशिष्य सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्याः सुकान्त कुमार सेनापतिवर्याः अवोचन् यत् न कस्यापि विरोधः न कदापि बर्मनवर्यैः कृतः। एते अजातशत्रुरिव आसन् इति। विश्वविद्यालयस्य सर्वेऽपि अधिकारिणः क्रमशः बर्मनवर्यैः सह व्यतीतान् सुखमयक्षणान् सदृष्टान्तम् उपपादयन्। आचार्याः रणजित कुमार बर्मनवर्याः भाषमाणाः अवोचन् यत् “ यथाशक्ति मया कार्यं कृतमेव। कुलसचिवपदं मम कल्पनातीतम् आसीत्। परन्तु स्वीकृतं दायित्वं यथाशक्ति मया निरूढम्। पदप्राप्तिविषये सर्वदा अहम् ऋणात्मकं चिन्तनम् एव करोमि स्म। पदलिप्सा मयि मास्तु इत्यतः तथा चिन्तयामि। ज्ञात्वा अज्ञात्वा वा मयि कोप्यपराधः कृतः चेत्तर्हि क्षन्तव्योयं जनः” इति।

सर्वान्ते कुलपतयः आचार्याः श्रीनिवासः वरखेडीवर्याः अब्रुवन् यत् “पूर्वोत्तरराज्येषु अग्रेऽपि विकासकार्याणि सम्पादयितुं बर्मनवर्याः अस्माकं सहायकाः भविष्यन्ति इति। निष्कामबुध्या कार्यं कुर्वन्तः कुलसचिवपदस्य गरिमाणं बर्मनवर्याः अद्यावधि परिरक्षितवन्तः। कार्ये भावे नियमे च शुचिता आचार्यबर्मनवर्याणां विशेषताः सन्ति। एतेषाम् अभिप्रायं प्रतिपदं स्वीकृत्य प्राशासनिकं सख्यमनुभूय च सर्वाण्यपि विश्वविद्यालयीयकार्याणि सुचारूरूपेण अस्माभिः सम्पादितानि सन्ति। नूतनाः नियुक्तयः नूतनाः प्रस्तावाः नूतनानि भौतिकसौकर्याणि च अमीषां कार्यकाले सम्पन्नानि सन्ति। शैक्षिकैः प्राशासनिकैश्च अधिकारिभिः सह अकपटेन मनसा व्यवहर्तुं बर्मनवर्याः अग्रेसराः आसन्। सर्वप्रियाः एते सर्वप्रियत्वसम्पदानार्थं कदापि नैव प्रायतन्त। अतः मत्पक्षतः विश्वविद्यालयपक्षतश्च धन्यवादान् व्याहरामि” इति।

अन्ते रिक्तस्य कुलसचिवपदस्य परिपूरणाय आचार्याः रा.गा. मुरलीकृष्णवर्याः समर्थाः सन्ति इति समुद्घोष्य कुलसचिवत्वेन ते कुलपतिभिः सद्यः नियुक्ताः। परीक्षानियन्त्रकरूपेण आचार्याः पवनकुमारगुप्तवर्याः पूर्णकालिकरूपेण नियुक्ताः सन्ति इत्यपि कुलपतिभिः

सन्दर्भेऽस्मिन् घोषणा कृता। वरिष्ठाचार्याः प्रो. मदनमोहनझावर्याः छात्रकल्याणानुभागस्य अधिष्ठातृपदं इतः परं निर्वहन्ति इत्यपि कुलपतयः सकाले समुदघोषयन्। शान्तिमन्त्रोत्तरं चायपानगोष्ठी सुग्रासभक्ष्यव्यवस्था सर्वेभ्यः परिकल्पिता। आचार्याः मधुकेश्वरभट्टवर्याः कार्यक्रमस्यास्य सुचारुरूपेण निर्वहणमकुर्वन्।




**प्रतिवेदननिर्माणम्**

डा.गणेश ति. पण्डितः

उपनिदेशकः , प्रकाशनानुभागः